ॐ स्वस्ति श्रीगणेशाय नमः ॥ इह भगवान् शंकराचार्यः उत्तमाधिकारिणां वेदांत
प्रस्थानत्रयं निर्माय ॥ तदवलोकनासमर्थानां मंदबुद्धीनां अनुग्रहार्थं सर्ववेदांतसिद्धांतसंग्र
हं आत्मबोधाख्यं प्रकरणं निर्दिशीपिषुस्तत्प्रतिजानीते ॥ तपोभिरिति कृच्छ्रचांद्रायणनित्यनैमित्तिक
तपोभिः क्षीणपापानां शांतानां वीतरागिणां ॥ मुमुक्षूणामपेक्ष्योयमात्मबोधोभिधीयते १
उपासनाद्यनुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागाद्यंतःकरणदोषा येषां ते नित्यनै
मित्तिकैरेव कर्मणा दुरितक्षयमाप्नोतीति वचनात् ॥ अत एव शांतानां अहोमितान्वा
यानां वीतरागिणां ॥ इहामुत्रफलभोगरहितानां मुमुक्षूणां संसारग्रंथिभेदने कृत
प्रयत्नानां यथोक्तसाधनसंपन्नानां ॥ अयमात्मा आत्मबोधोऽभिधीयते विधिमुखेन

१

वपुपवनताप्रतिपाद्यते इत्यर्थः १ ननु तपोमंत्रकर्मयोगाद्यनेकसाधनेषु सत्सु
मोक्षंप्रतिबोधएवकिमितिप्राधान्येनोच्यते इत्यतआह बोध इति ।। ३ ।।

बोधोन्यसाधनेभ्योहि साक्षान्मोक्षैकसाधनं। पाकस्य वह्निवत्
ज्ञानंविनामोक्षोनसिध्यति २

तपोमंत्रकर्मयोगादिसाधनानि परंपरयाक्रमेण ज्ञानद्वारा मोक्षं साधयंति
ज्ञानं तु स्वजन्ममात्रादेव अज्ञानं नाशयित्वा मुमुक्षुं स्वराज्ये अभिषेच
यति अतोन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तं २

तदेवदृष्टांतेन दृढयति पाकस्येति ॥ यथा लोके पचनक्रियायाः काष्ठजलभां
डादिसाधनेषु सत्स्वपि वन्हिं विना पाको न सिद्ध्यति तद्वत् ज्ञानं विना मोक्षो
न सिद्ध्यतीत्यर्थः २ ननु कर्मणो विचित्रफलाप्तिमत्वात् तत्कर्मैव किंचिदज्ञा
नं नाशयिष्यति ॥ किमात्मज्ञानेनेत्याशंक्याह कर्मज्ञानयोर्विरोधाभावान्नैव

अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ॥ विद्याविद्यां निहंत्येव तेज

स्तिमिरसंघवत् ३

द्वि

मित्याह ॥ अविरोधीति ॥ कर्मणो विद्याविरोधाभावात् अज्ञानं नाशयितुं नोत्सह
ते ॥ विद्यायाः प्रकाशरूपत्वात् ॥ अंधतमसं तेजःपुंज इव नाशयितुं समर्थ इत्यर्थः ३ श्री
शाननुप्रतिशरीरं आत्मा परिच्छिन्न एवोपलभ्यते कथमस्य कैवल्यमित्याशंक्याह परिच्छिन्न इति

श्रा० २

परिछिन्न इवाज्ञानात्तन्नाशे सति केवलः स्वयं प्रकाशते ह्यात्मा मेघापायेंशुमानिव परिपूर्णस्या
द्वितीयस्यात्मनः ॥ अज्ञानपरिकल्पितोहं वचशरीराद्यासक्तत्वपरिछिन्नत्वमविवेककृतमेव न
तु तत्त्वदृष्ट्या अतो अविवेकहानादात्मा केवल एव प्रकाशते मेघावरणाभावे भानुवत् ॥ स्पष्टार्थः ४
परिछिन्न इवाज्ञानात्तन्नाशे सति केवलः ॥ स्वयं प्रकाशते चात्मा मेघापायेंशुमानिव ४
अज्ञानात्कलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलं ॥ कृत्वा ज्ञानं स्वयं नश्येत् जलं कतकरेणु
वत् ५ श्रीहृतलक्ष्मीजनये नमः

न चात्मनो द्वैतसिद्धिरयुक्तावत्ति ज्ञानेन द्वैतसिद्धिरित्यत आह ॥ अज्ञानादिति अज्ञानका
र्यैरहंतेरागादिदोषैः कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभिमानिनं जीवं ज्ञानं कर्तृ चिरका
भ्यासाद्ज्ञानकृतेन द्वारा तत्कार्यैः तंतःकरणनिःशेषं नाशयित्वा स्वयमेव नश्यति ॥ अज्ञा
नकार्यत्वाद् द्वैतेत त्रुतैतिर्विविते ज्ञानमात्माभासत्वादात्मन्यैवैक्यं भवति ॥ तदानीं द्वप

२

भेदात्मनाप्रकाशते यथाशुक्तिकारेणरजतं जलंनिर्मलंलोके त्वात्स्वयमेव नदृश्यति ॥ तद्व
दित्यर्थः ५ ननु अपरोक्षतयानुभूयमानस्य संसारस्य । कथमसत्यत्वं नासत्वं प्रत्यक्षविरुद्ध
मित्याशंक्याह स्वप्नदृष्टांतेनास्य मिथ्यात्वं साधयति ॥ संसार इति ॥ रागद्वेषादिभिः सं
कुलायमानः संसारः स्वकाले स्वस्वकारणभूतानात्मज्ञाने स्थिते तावन्निमिथ्याभूतो

संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ॥ स्वकाले सत्य
वद्भाति प्रबोधे सत्यवद्भवेत् ६

पि संसारः सत्यवद्भाति प्रबोधो सति वाक्यश्रवणादात्मज्ञानोत्पत्तौ सत्यवद्भवति
तत्र दृष्टांतः स्वप्नतुल्य इति स्वप्नो हि यावन्निद्रानुभूते तावन्निमिथ्याभूतोपि सत्यव
द्भाति प्रबोधे निद्रानाशे सति मिथ्यात इत्यर्थः ६

३ आ०

जगन्मिथ्यात्वमेव दृष्टांतांतरेणाद्दृढयति ॥ तावदिति ॥ यावान्नोत्पद्यते त्रिको
णादिषु विशेष ज्ञानेनोत्पद्यते तावद्रजितज्ञानं सत्वमेवानुभूयते । तथात्मस
र्वाधिष्ठानम् सच्चिदानंदरूपं ब्रह्म यावन्न ज्ञायते सा तावन्नानुभूयते । तावत्
जगदाकारेण परिणमितः संसारः सत्य इव भ्रांत्या दृश्यते इत्यर्थः ७ सर्वरूपे

तावत्सत्यं जगद्भाति शुक्तिकारजितं यथा । यावन्न ज्ञायते ब्रह्म सर्वाधि
ष्ठानमद्वयं ७ सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः । व्यक्तयो वि
विधाः सर्वाः हाटके कटकादिवत् ८

प्रपंच जातं ब्रह्मणो विवर्त्तरूपतां प्रतिपादयति सदिति सत्य ज्ञानानंदात्मनि नि
त्ये सर्वानुस्यूते विष्णौ व्यापके ब्रह्मणि । देव दानव यक्ष ऋषयो नराः स्थावरजंगमा
वि दयो विविधा अपि व्यक्तयः सर्वाः पादानभूते परब्रह्मणि ईश्वरे हेम्नि कटकेषु द्रिका

३

वत्कमर्पीकोमोघ्नाद्दृष्टांतेनदृढयति॥ यथेति॥ हृषीकेशः मनःप्रभृतिसर्वेंद्रियप्रवर्तकः॥
नियामकोवाविभुः सर्वगतः परमेश्वरः स्वमायया परिकल्पितनानाविधोपाधिस्यप्रति
विंबितः सन्नानेवभातितत्राप्रोक्सतिवस्तैकत्वानेनतेषांमाययाकल्पितदेहाद्युपाधीनो
नाशेसतिकेवलएकएववद्भवति यथाएकरावमाकाशोमट घटाद्युपाधिषुएकेनानाविधो

यथाकाशोहृषीकेशोनानोपाधिगतोविभुः॥ तद्भेदाद्भिन्नवद्भातितन्नाशादेक
वद्भवेत्॥९॥ नानोपाधिवशादेवजातिवर्णाश्रमादयः॥ आत्मन्यारोपितास्तोयेर
सवर्णादिभेदवत्॥१०॥ रामनामायनमः

भवतिउपाधिलयादेकवद्भवतितद्वदित्यर्थः॥९॥ ननुसर्वदेहेषुतत्तज्ञानादिरजुवध
स्वकर्पणित्यमुक्तस्वरूपयेते॥ तत्राह नानानापाधिइति॥ पूर्वोक्तनानोपाधिवशादेवात्मनिजा
वर्णाश्रमादयः॥ आरोपितामाययाकल्पिताः ननुसतः यथास्वभावमाधुर्येजलेकटुगतत्व

श्रो० ४

पंचि

आत्मनो विद्यापरिकल्पितोपाधिद्वयमध्ये स्थूलोपाधिमाह ॥ पंचीकृतेति ॥ पंचानां भूतानां पूर्वैकं द्विधा विभज्य तदेकैकमर्धं चतुर्धा विभज्य स्वेतरार्धांशपरित्यागेन इतरेषु योजनं पंचीकरणं ॥ एवं कृतेभ्यः एवं कृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः संभवो यस्य प्रख्यकर्मभिः संचितैरर्जितं तत्स्थूलशरीरं सुखदुःखानामनुभवायतनं भोगस्थानं प्रत्यगा

पंचीकृतमहाभूतसंभवं कर्मसंचितं। शरीरं सुखदुःखानां भोगायतनमुच्यते ११ पंचप्राणमनोबुद्धिदशेन्द्रियसमन्वितं। अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनं १२

सूक्ष्मोपाधिमाह ॥ पंचेति ॥ पंच प्राणाः एकस्यैव महाप्राणस्य पंच वृत्तयः ज्ञानेन्द्रियकर्मेन्द्रियभेदेन इन्द्रियाणि दश। मनःशब्देन संकल्पविकल्पविकल्पात्मकं अंतःकरणवृत्तिः बुद्धिर्निश्चयात्मिका ॥ एतैः संयुक्तं अपंचीकृतभूतेभ्यः संजातं सूक्ष्मांगं लिंगशरीरं सुखदुःखभोगसा

४

तृतीयं कारणोपाधिमाह । अज्ञानादिति । सदसद्भ्यामनिर्वाच्याऽविद्याऽनादिः सती
कारणोपाधिरुच्यते । सा च समष्टिव्यष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः कारणम्
तत्त्वात्कारणोपाधिरुच्यते । उपाधित्रितयकल्पनेप्रयोजनमाह । उपाधित्रितयादन्यमिति । तत्साक्षिणमात्मानमवधारयेत्
जानीयादित्यर्थः १३ ननु नन्वन्नमयादिपंचकोशपरिवृत्त्या प्रतीतन्मयतयावस्थितस्य कूटस्थात्मनः कथं मुच्यते दृष्टान्तेन स्पष्टीकरोति ।। पंचकोशे
ति । अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः पंचकोशाः आदिशब्देनास्थूलादिशरीरत्रयं तैर्योगेन संबन्धेन तत्तन्मय

अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते । उपाधित्रितयादन्यमात्मान-
मवधारयेत् १३ पंचकोशादियोगेन तत्तन्मय इव स्थितः । शुद्धात्मा नीलव-
स्त्रादियोगेन स्फटिको यथा १४

न तत्तन्मय इव स्थितः शुद्धात्मा शुद्धः तत्तेषु रंजितश्च स्तुतेरंजितः । विवेकः स्वभा-
एवं पुरुषोऽन्तःकरणमयः स्यादिभिः सूक्ष्मवस्तुस्वभावाः पंचमिकोपाधिसंबन्धः
यतो नन्वेतच्छुद्धो निर्मलः स्फटिको नास्तीनवस्त्रादियोगेन तन्मय इव भाति न स्फटिको नीलं स्यात् तथा

अंतरात्मस्वरूप आत्मविवेचनप्रकारमाह ॥ वपुरिति ॥ पञ्चकोशैस्तावद्
दात्मन्यात्मनि स्थितं वपुः स्थूलं शरीरं तुषादिभिर्युक्तं तंडुलमिव युक्तेः पुरुषा
वघाततः अवहननात् ॥ शुद्धमात्मानं तंडुलमिव विविच्यात् विवेकेन जानीयात्
कथं अयं स्थूलदेहोपि नात्मा भूतकार्यत्वात् घटवत् सूक्ष्मदेहोपि नात्मा देहत्वात् स्थूल

वपुस्तुषादिभिर्युक्तं कोशैर्युक्त्यावघाततः ॥ आत्मानमंतरं शुद्धं विविच्या
त्तंडुलं यथा ॥१५॥ सदा सर्वगतोप्यात्मा न सर्वत्रावभासते बुद्धावेवावभासे
त स्वच्छेषु प्रतिबिंबवत् ॥१६॥

स्थूलदेहवदित्यनुमानादिना तेभ्यः कोशेभ्यो भिन्नमात्मानं विविच्यात् जानी
यादित्यर्थः ॥ नन्वात्मा सर्वगतः स्यात् हि किं सर्वत्र सर्वैर्न दृश्यते इत्याशंक्याह ॥ सदेति
आत्मा सर्वगतोपि सर्वत्र व्याप्य स्थितोपि जडेषु देहेषु प्रवर्ततेनैव प्रकाशते रागपादि
भिरपविद्धायां बुद्धौ एव भासते तेन सर्वत्र यथा प्रतिबिंबः स्वच्छेष्वेव दर्पणादिषु दृश्य
ते नान्यत्र तद्वदित्यर्थः ॥१६॥

देहस्थितत्वात्तैः सहात्मजः उदासीनस्य राज्ञ दृष्टान्तेनाह देहेन्द्रियेति देहेन्द्रियमनोबु
द्धिप्रकृतिभ्यो जडरूपेभ्य आत्मा देहादिभ्यो विलक्षणः शुद्धात्मानं। तद्वृत्तीनां साक्षितया स्थि
तं। यथा राजा स्वनगरेषु स्थितेषु मंत्रिषु वर्तमानेषु स्वयं साक्षितया स्थितस्तान्पश्य
तीति तद्वज्ज्ञानीयादित्यर्थः १७ न चात्मनोऽप्यविकारित्वमयुक्तं सर्वदा व्यापारवानेव

देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणं [illegible] तद्वृत्तिसाक्षिणं विद्यादात्मानं दे
राजवत्सदा १८ व्यापृतेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिनां दृश्यतेऽभ्रेषु
धावन्निव यथा शशी १९ दृश्यते तत्राह व्यापृतेष्विति। इन्द्रियादिषु स्वस्व
विषयेषु व्यापृतेषु प्रवृत्तेषु सत्सु आत्मा व्यापारीवाविवेकिनां। गुरुशास्त्रोपदेश
रहितानां दृश्यते न तु तत्त्वदृष्ट्या यथा मेघखंडेषु वायुवशात् धावत्सु चन्द्रोऽपि धा
वतीव लोकैर्दृश्यते न तु चन्द्रमा धावति तथात्माऽपीत्यर्थः १९

ननु देहेंद्रियबुद्ध्यादयो पि सचेतना दृश्यंते किमात्मानमाश्रित्य प्रवर्तंते तत्राह ॥ आत्मचैतन्यमि
ति नित्यज्ञानस्वरूपमात्मचैतन्यं आश्रित्य देहेंद्रियमनोबुद्ध्यादयः स्वकीयार्थेषु प्रवर्तंते यथा ज
नाः प्राणिनः सूर्यप्रकाशमाश्रित्य व्यापारेषु व्यवहरंति अतश्चैतन्यज्ञानमात्मन एव देहेंद्रियम
नोबुद्ध्यादयस्तु जडा इत्यर्थः १९ नन्वहं जातोस्मि बाल्यकौमाराद्यवस्थामनुभवामि पुष्टोस्मीत्य

आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः स्वकीयार्थेषु वर्तंते
सूर्यालोकं यथा जनाः १९ देहेंद्रियगुणान्कर्माण्यमले सच्चिद
दात्मनि अध्यस्यस्यविवेकेन गगने नीलतादिवत् २०

नुवननुवरतमनुभूयमानस्यात्मनः कथमविकारित्वमुच्यते इत्यत्राह देहेंद्रियगुणानिति दे
हेंद्रियमनोबुद्धिधर्मान्गुणांश्च सत्वादीन् कर्माणींद्रियव्यापारान् मिथ्याज्ञानादात्म्येन
स्थितेनामलेऽसंगरूपे सच्चिदात्मके परमात्मन्येतत्सामीप्या

५

दविवेकृतोधासंसक्तिर्यथागगनेनीलतादिवत् अतस्तेआत्मधर्मानभवंतिअपितुदेहा दीनामेवेत्यर्थः २० ननुकर्त्तृत्वभोक्तृत्वादिकेआत्मनिअनुवर्त्तमनुभूयमानत्वात् उर्वीकृमित्याशंक्य तदपितथैवमिथ्याद्रष्टाहंअज्ञानादिति अज्ञानवशान्मानसोपउ

अज्ञानान्मानसोपाधिःकर्तृत्वादीनिचात्म
निकल्प्यंतेंवुगतोचंद्रेचलनादियथांभसः २१

पाधिःतस्यैवकर्तृत्वादयोधर्मास्तेचाज्ञानादात्मनिफल्पंतेयथांअंभसश्चलना दिकंअंभसिप्रतिबिंबवति चंद्रमसि अविवेकितः कल्पतेतद्वदेवात्मनीत्यर्थः २१

रागेछासुखदुःखादीनात्मधर्मान्मन्यंतेवैशेषिकादयः तान्निराकरोति रागेति सुरागे
छासुखदुःखप्रयत्नादिकं सर्वंबुद्धेरेवनत्वात्मनः कथंजाग्रत्स्वप्नयोर्बुद्धौसत्यांप्रवर्तते ।
सुषुप्तौतस्याबुद्धेः नाशेकारणेलीनेनचप्रवर्तते तस्माद्बुद्धेरेवनत्वात्मनः इति २२ त ।

रागेछासुखदुःखादिबुद्धौसत्यांप्रवर्तते । सुषुप्तौनास्तितन्नाशेतस्मा
द्बुद्धेस्तुनात्मनः २२ प्रकाशोऽर्कस्यतोयस्यशैत्यमग्नेर्यथोष्णता ।
स्वभावःसच्चिदानंदनित्यंनिर्मलआत्मनः २३

ईदृशआत्मकीदृशःस्वभावइत्याशंक्यआत्मानमुपदिशतिप्रकाशइति । यथाप्रकाशएवअर्कस्य
स्वभावः तोयस्यशैत्यं अग्नेरुष्णता तथात्मनोनित्यसच्चिदानंदनिर्मलः स्वभावः स्वरू
पमित्यर्थः २३

ननु यद्यप्यविकार्ययमात्मा तर्हि जानामीति प्रत्ययः कथमित्यपेक्षायामाह आत्मन इति ॥ प्रत्यगा
त्मनः सच्चिदंशावुभौ सद्भावांशः आत्माभासः बुद्धिवृत्ति एतत्त्रयं अविवेकेन संयोज्य असंगस्या
त्मनः केनापि संयोगो नास्त्येव तथापि अज्ञानवशात् केवलं संभाव्य जानामीति प्रत्ययः अहंका
रवृत्तिः प्रवर्तते केवलप्रत्यगात्मनः किंचित्विकारो नास्तीति भावः २४ एतदेव दर्शयति आत्म
आत्मनः सच्चिदंशाश्च बुद्धेर्वृत्तिरिति द्वयं ॥ संयोज्य चाविवेकेन जानामीति प्र
वर्तते २४ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति जीवः सर्वमलं ज्ञात्वा
कर्ता द्रष्टेति मुह्यति २५ ध्ये
न इति आत्मा स्वभावादेव विकाररहितः बुद्धेः कदाचिदपि बोधः प्रकाश एव नास्ति तथापि जी
वसाभासाहंकारः सर्वसामांसान्तःकरणवृत्तीनां एकत्र तत्त्वाय सपिंडवदेकत्र संग
तमेवमलमतस्यं ज्ञात्वा देहेन्द्रियादिकमहमिति विचार्याहं कर्ता द्रष्टेति मुह्यत्यंतोम २५

८

ऽत्मा स्वयमेव स्वस्मिन्नविवेकेनान्यधर्मानारोप्य बिभेतीत्याह रज्जुसर्पवदिति य
थान्धकारादौ विकाररहितेरज्वादौ सर्पाद्यारोपणं कृत्वा भयं कंपादिकं करोति एव
मात्मापि स्वस्मिन्जीवत्वमारोप्य सद्वितीयं परिच्छिन्नं ज्ञात्वा भयदुःखसागरे निम

रज्जुसर्पमिवात्मानं जीवो ज्ञात्वा भयं वहेत् नाहं जीवः परात्मे
ति ज्ञातश्चेन्निर्भयो भवेत् २६ ॥८॥

ग्नो भवति यदा शास्त्राचार्यप्रसादेन शास्त्रार्थज्ञानमुत्पन्नं भवति तदा विवेकचक्षुषा स्व
त्मानमखंडानंदं ज्ञात्वैकरूपं सपरूपन नाहं जीवः परमात्माहमिति ज्ञात्वा भयदुःखा
दिरहितः सुखी भवेत् २६ श्रीकृष्णचंद्राय नमो नमः ॐ नमः शिवाय नमः

८

नन्वात्मनस्तत्सामीप्ये बुद्धि मनोहंकारादिभिः ॥ कथं नावलोक्यते न ज्ञा
यते तत्राह आत्मेति आत्मा केवल एव सन्नपि बुद्धिमनोहंकारादीनवभासयति
तैर्जडैर्भिन्नघटादिभिर्नावभास्यते यथा एक एव दीपः घटादीन् सर्वानपि प्रकाश
यति घटादिभिर्नावभास्यते तद्वदित्यर्थः २७

आत्मावभासयत्येको बुद्ध्यादीनींद्रियाणि च दीपो घटादिव
त्स्वात्मा जडैस्तैर्नावभास्यते २७ स्वबोधे नान्यबोधेच्छा बोधरू
पतयात्मनः न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने २८ ॥

नन्वात्मा बुद्ध्याहंकारादिभिर्यदि नावभास्यते तर्हि आत्मज्ञाने ज्ञानांतरेण भवितव्य
मित्याशंक्य तत्राह स्वबोध इति आत्मनो बोधरूपत्वात् स्वबोधे निजस्वरूपे तस्यात्म
नो बोधाय ज्ञानान्य ज्ञानांतरापेक्षा नास्त्येव अनुभवस्वरूपत्वात् यथा दीपस्यैव स्व
प्रकाशने दीपांतरापेक्षा नास्तीत्यर्थः २८

ननु यदि बुद्ध्यादिभिरात्मा ज्ञेयो न भवेत्तर्हि ब्रह्मज्ञाने उपायांतरं वक्तव्यं स उपायकः इ-
त्यत आह। निषिध्येति। नेति नेतीति निरसनवेदवाक्यैर्निखिलोपाधिं निषिद्ध्य आत्मा
नेन ज्ञात्वा तत्त्वमसीत्युपमात्माब्रह्मैक्यं तदस्मि इत्यादिवाक्यलक्षणया ब्रह्मात्मैक्यज्ञानं
विंद्यात् प्राप्नुयात् अनेन प्रकारेण ज्ञातव्य इति भावः। २९ आत्मस्वरूपज्ञाने अतन्निर

निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः। विद्यादैक्यं महा-
वाक्यैर्जीवात्मपरमात्मनोः॥ २९ अविद्यकं शरीरादि दृश्यं बुद्बु-
दवत्क्षरं। एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं ३०॥

सनाभावे कोनः इत्यतस्तिरित्याशंक्याह। अतन्निरसनाभावे आत्मा ज्ञातुं न शक्यः यथा
नायं सर्प इति ज्ञात्वा रज्जुस्वरूपापाकरणाभावे रज्जुज्ञानं नोत्पद्यते तद्वदतन्निरसनाभा
वे नात्मा ज्ञातव्य इत्याशयेनाह॥ अविद्यकमिति। अविद्याकल्पितं देहेंद्रियादि सर्वं
दृश्यज्ञानं अविद्यके दृश्यमानं बुद्बुदवत् नश्वरं एतद्विलक्षणं निर्मलं निर-

काधिकं नित्यमेकं सच्चिदानंदात्मकं ब्रह्मैवा
हमस्मीति निदिध्यासनात् ततः कृतकृत्यो भवति इत्यर्थः
३०

एवमुक्तरीत्यात्मानमद्वयानंदं वाक्यार्थज्ञानेनापरोक्षतया ज्ञात्वा स्वानुभवावष्टंभेन स्वात्मन्येवात्मज्ञानमननप्रकारमाह पंचभिः श्लोकैः। देहान्यत्वाज्जडदृश्यत्वादिस्वभावः स्थूलशरीरादन्यत्वान्मे जन्मजराकार्श्यलयादयो न संति। इंद्रियादिभिः संगत्वा

देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः। शब्दादिविषयैः संगो निरिंद्रियतया न च ३१ अमनस्त्वान्न मे दुःखरागद्वेषभयादयः। अप्राणो ह्यमनाः शुभ्र इति च श्रुतिशासनात् ३२ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च। खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः। एतस्माज्जायते ३२

त्मे शब्दादिविषयैर्भोगैः संगोनुभवो नास्त्येव तत्र हेतुः। अमनस्कत्वेदेति। अमनस्त्वमित्यादि स्पष्टार्थः ३२ कथं इंद्रियप्राणमनसामात्मकत्वं तस्माचाप्यस्य श्रुतिप्रमाणयति अप्राण इति स्पष्टार्थः ३३

गुरुप्रसादात् स्वानुभवसिद्धमर्थं चाभिनयति। निर्गुण इत्यादिभिस्त्रिभिः श्लोकैः निर्गु
ण इति। अहं निर्गुणः बुद्ध्याद्यभावात् निःक्रियः इंद्रियाद्यभावात्। नित्यः अपक्षया
भावात् निर्विकल्पः संकल्पविकल्पाभावात् निरंजनः असंगत्वात् निर्विकारः षो
डशकलात्मकलिंगदेहभस्मत्वात् निराकारः निरवयवत्वात् नित्यमुक्तः बन्ध
नाभावात् निर्मलः अविद्यातत्कार्यरहितत्वात् ५४ ननु पूर्वोक्तैर्हेतुभिरेवं विशिष्टस्त्व

निर्गुणो निःक्रियो नित्यो निर्विकल्पो निरंजनः निर्विकारो नि
राकारो नित्यमुक्तोस्मि निर्मलः ५४ अहमाकाशवत्सर्वं बहिरं
तर्गतोच्युतः सदा सर्वसमः शुद्धो निःसंगो निर्मलोचलः ५५ अस्

तु एवमस्त्वसि एवं इत्युक्ते तत्किं विशिष्ट इत्याशंक्याह अहमिति अहं आकाशवत् सर्वं ब
हिरंतर्गतः दृश्यजातस्य बहिरंतर्गतः अच्युतः च्युतिरहितः सदा सर्वसमः विषमेष्वपि
समः व्याप्यस्थितः तथापि शुद्धः निर्मलः अचलः एतस्य चलनाभावात् ५५ श्रीराम